## वत्सरान्ताच्छश्छन्दसि। (९१/३४९३)

[1]वत्सरान्तात् प्रातिपदिकात् [2]निर्वृत्तादिष्वर्थेषु छन्दसि विषये छः प्रत्ययो भवति। ठञोऽपवादः। इद्वत्सरीयः। 'इदावत्सरीयः' (काठ. सं. १३. १५. ७१)॥

## संपरिपूर्वात् ख च। (९२/३४९४)

संपरिपूर्वात्[3] वत्सरान्तात् प्रातिपदिकाच् छन्दसि विषये निर्वृत्तादिष्वर्थेषु खः प्रत्ययो भवति, चकाराच् छश्च। 'संवत्सरीणाः' (तै.सं.४. ३. १३. ४), 'संवत्सरीया' (काठ. सं. १३.१५.७१)। 'परिवत्सरीणम्' (ऋ. ७.१०३.८), 'परिवत्सरीया' (काठ. सं. १३. १५. ७१)॥

## तेन परिजय्यलभ्यकार्यसुकरम्। (९३/१७८७)

तेन इति तृतीयासमर्थात् कालवाचिनः प्रातिपदिकात् [4]परिजय्य, लभ्य, काय, सुकर इत्येतेष्वर्थेषु ठञ् प्रत्ययो भवति। मासेन परिजय्यः, [5]शक्यते जेतुं, मासिको व्याधिः। सांवत्सरिकः। मासेन लभ्यः मासिकः पटः[6]। मासेन कार्यम् मासिकं चान्द्रायणम्[7]। मासेन सुकरः मासिकः प्रासादः॥

## तदस्य ब्रह्मचर्यम्। (९४/१७८८)

तद् इति द्वितीयासमर्थविभक्तिः। [8]सा चात्यन्तसंयोगे। अस्य इति प्रत्ययार्थः। ब्रह्मचर्यम् [9]इति द्वाभ्यामपि सम्बध्यते। कालस्य व्यापकं, प्रत्ययार्थस्य च [10]स्वम् इति। तद् इति द्वितीयासमर्थात् कालवाचिनः प्रातिपदिकाद् अस्य इति षष्ठचर्थे ठञ् प्रत्ययो भवति, ब्रह्मचर्यं चेद् [11]गम्यते। मासं ब्रह्मचर्यमस्य मासिकः ब्रह्मचारी। आर्धमासिकः। सांवत्सरिकः।

अपरा वृत्तिः – तद् इति प्रथमासमर्थाद् अस्य इति षष्ठचर्थे ठञ् प्रत्ययो भवति, [12]यत् तदस्य इति निर्दिष्टं ब्रह्मचर्यं चेद् तद् भवति। मासोऽस्य ब्रह्मचर्यस्य मासिकं ब्रह्मचर्यम्। आर्धमासिकम्। सांवत्सरिकम्। पूर्वत्र ब्रह्मचारी प्रत्ययार्थः, उत्तरत्र ब्रह्मचर्यमेव। [13]उभयमपि प्रमाणम्, उभयथा[14] सूत्रप्रणयनात्।

[५२५] महानाम्न्यादिभ्यः षष्ठीसमर्थेभ्य उपसङ्ख्यानम्। (म. भा. २. ३६०)

[15]माहानामिकम्। गौदानिकम्। आदित्यव्रतिकम्।

---

1. वत्सरशब्दान्तात् फ. 2. निर्वृत्ताद्यर्थे फ. 3. च इत्यधिकम् फ. 4. परिजय्यादिष्वर्थेषु क, नास्ति ह. फ. 5. शक्यते जेतुं नास्ति ह, परिजेतुं क. ड. 6. सांवत्सरिकः पटः इत्यधिकम् ह. 7. व्रतम् इत्यधिकम् क.ग. 8. सा नास्ति क. फ, द्वितीया इत्यधिकम् ह. 9. इति नास्ति फ. 10. स्वम् नास्ति ब, इति नास्ति फ. 11. ध्वनिः क, गृह्यते फ. 12.यत् नास्ति फ. 13. द्वयमपि ब. क. फ. 14. अपि इत्यधिकम् क. 15. महानाम्नीनां ब्रह्मचर्यम् इत्यधिकम् ब. क. फ. ड, माहानाम्निकं ब्रह्मचर्यम् ह.